**CBSE कक्षा - 9 संस्कृत**

**एनसीईआरटी प्रश्न-उत्तर**

**पाठः - 11 पर्यावरणम्**

**अभ्यासः**

1. **अधोलिखितानां प्रश्नानामुत्तराणि संस्कृतभाषया लिखत-**
   i. **प्रकृतेः प्रमुखतत्त्वानि कानि सन्ति?**
   ii. **स्वार्थान्धः मानवः किं करोति?**
   iii. **पर्यावरणे विकृते जाते किं भवति?**
   iv. **अस्माभिः पर्यावरणस्य रक्षा कथं करणीया?**
   v. **लोकरक्षा कथं संभवति?**
   vi. **परिष्कृतं पर्यावरणम् अस्मभ्यं किं किं ददाति?**

   **उत्तराणि-**
   i. प्रकृतेः प्रमुखतत्त्वानि सन्ति - पृथिवी, जलं, तेजः, वायुः, आकाशः च।
   ii. स्वार्थान्धः मानवः पर्यावरणम् नाशयति।
   iii. पर्यावरणे विकृते जाते विविधाः रोगाः भीषणसमस्याश्च जायन्ते।
   iv. अस्माभिः वृक्षान्, स्थलचरान्, जलचरान् च रक्षित्वा पर्यावरणस्य रक्षा करणीया।
   v. लोकरक्षा प्रकृतिरक्षया संभवति।
   vi. परिष्कृतं पर्यावरणम् अस्मभ्यम् शुद्धवायुं, स्वच्छजलम्, नीरोग स्वस्थं शरीरं च ददाति।
2. **स्थूलपदान्यधिकृत्य प्रश्ननिर्माणं कुरुत-**
   i. **<u>वनवृक्षाः</u> निर्विवेकं छिद्यन्ते।**
   ii. **<u>वृक्षकर्तनात्</u> शुद्धवायुः न प्राप्यते।**
   iii. **प्रकृतिः <u>जीवनसुखं</u> प्रददाति।**
   iv. **अजातश्शिशुः <u>मातृगर्भे</u> सुरक्षितः तिष्ठति।**
   v. **पर्यावरणरक्षणं <u>धर्मस्य</u> अङ्गम् अस्ति।**

   **उत्तराणि-**
   i. <u>के</u> निर्विवेकं छिद्यन्ते?
   ii. <u>कस्मात् कारणात्</u> शुद्धवायुः न प्राप्यते?
   iii. प्रकृतिः <u>किं</u> प्रददाति?
   iv. अजातश्शिशुः <u>कुत्र</u> सुरक्षितः तिष्ठति?
   v. पर्यावरणरक्षणं <u>कस्य</u> अङ्गम् अस्ति?
3. **उदाहरणमनुसृत्य पदरचनां कुरुत-**
   i. **यथा- जले चरन्ति इति - जलचराः**

**स्थले चरन्ति इति - ____________**

**निशायां चरन्ति इति - ____________**

**व्योम्नि चरन्ति इति - ____________**

**गिरौ चरन्ति इति - ____________**

**भूमौ चरन्ति इति - ____________**

ii. **यथा- न पेयम् इति - अपेयम्**

**न वृष्टि इति - ____________**

**न सुखम् इति - ____________**

**न भावः इति - ____________**

**न पूर्णः इति - ____________**

**उत्तराणि-**

i. स्थलचराः

निशाचराः

व्योमचराः

गिरिचराः

भूमिचराः

ii. अवृष्टि

असुखम्

अभावः

अपूर्णः

4. **उदाहरणमनुसृत्य पदनिर्माणं कुरुत-**

**यथा- वि + कृ + क्तिन् = विकृतिः**

i. **प्र + गम् + क्तिन् =** ____________
ii. **दृश् + क्तिन् =** ____________
iii. **गम् + क्तिन् =** ____________
iv. **मन् + क्तिन् =** ____________
v. **शम् + क्तिन् =** ____________
vi. **भी + क्तिन् =** ____________
vii. **जन् + क्तिन् =** ____________
viii. **भज् + क्तिन् =** ____________
ix. **नी + क्तिन् =** ____________

**उत्तराणि-**

i. प्रगतिः

ii. दृष्टिः
iii. गतिः
iv. मतिः
v. शान्तिः
vi. भीतिः
vii. जातिः
viii. भक्तिः
ix. नीतिः

5. **निर्देशानुसारं परिवर्तयत-**

**यथा- स्वार्थान्धो मानवः अद्य पर्यावरणं नाशयति (बहुवचने)।**

**स्वार्थान्धाः मानवाः अद्य पर्यावरणं नाशयन्ति।**

i. **सन्तप्तस्य मानवस्य मङ्गलं कुतः? (बहुवचने)**
ii. **मानवाः पर्यावरणकुक्षौ सुरक्षिताः भवन्ति। (एकवचने)**
iii. **वनवृक्षाः निर्विवेकं छिद्यन्ते। (एकवचने)**
iv. **गिरिनिर्झराः निर्मलं जलं प्रयच्छन्ति। (द्विवचने)**
v. **सरित् निर्मलं जलं प्रयच्छति। (बहुवचने)**

**उत्तराणि-**

i. सन्तप्तानां मानवानां मङ्गलं कुत।
ii. मानवः पर्यावरणकुक्षौ सुरक्षितः भवति।
iii. वनवृक्षः निर्विवेकं छिद्यते।
iv. गिरिनिर्झरौ निर्मलं जलं प्रयच्छतः।
v. सरितः निर्मलं जलं प्रयच्छन्ति।

6. **पर्यावरणरक्षणाय भवन्तः किं करिष्यन्ति इति विषये पञ्च वाक्यानि लिखत।**

**यथा- अहं विषाक्तम् अवकरं नदीषु न पातयिष्यामि।**

i. ______________________________
ii. ______________________________
iii. ______________________________
iv. ______________________________
v. ______________________________

**उत्तराणि-**

i. अहं वृक्षकर्तनम् न करिष्यामि।
ii. अहं स्थलचरान् कुक्कुरादीन् रक्षिष्यामि।
iii. अहं मत्स्यादीन् जलचरान् न हनिष्यामि।

iv. अहं पृथिवीं, जलं, वायुं च केनापि प्रकारेण अशुद्धान् न करिष्यामि।
v. अहं लोकरक्षायै प्रकृतिं रक्षिष्यामि।

7. **(क) उदाहरणमनुसृत्य उपसर्गान् पृथक्कृत्वा लिखत-**

**यथा- संरक्षणाय - सम्**

i. **प्रभवति - ......................**
ii. **उपलभ्यते - ......................**
iii. **निवसन्ति - ......................**
iv. **समुपहरन्ति - ......................**
v. **वितरन्ति - ......................**
vi. **प्रयच्छन्ति - ......................**
vii. **उपगता - ......................**
viii. **प्रतिभाति - ......................**

**उत्तराणि-**

i. प्र
ii. उप
iii. नि
iv. सम्
v. वि
vi. प्र
vii. उप
viii. प्रति

**(ख) उदाहरणमनुसृत्य अधेलिखितानां समस्तपदानां विग्रहं लिखत-**

**यथा- तेजोवायुः - तेजः वायुः च।**

**गिरिनिर्झराः - गिरयः निर्झराः च।**

i. **पत्रपुष्पे - ......................**
ii. **लतावृक्षौ - ......................**
iii. **पशुपक्षी - ......................**
iv. **कीटपतङ्गौ - ......................**

**उत्तराणि-**

i. पत्रं च पुष्पं च।
ii. लता च वृक्षः च।
iii. पशवः च पक्षिणः च।
iv. कीटः च पतङ्गः च।